# षशिव सहस्रनाम स्तोत्रम

वासुदेव उवाच

ततः स प्रयतो भूत्वा मम तात युधिष्टिर ।
प्राञ्चलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ।।

उपमन्युरुवाच

ब्रह्मप्रोक्तैॠषिप्रोक्तैवेदवेदांगसंभवैः ।
सर्वलोकेषु विख्यातैः स्थाणुं स्तोष्यामि नामभिः ।।
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ॠषिणा तण्डिना भक्तया कृतैर्देवकृतात्मना ।।
यथोक्तैर्लोकविख्यातैर्मुनिभिस्तत्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ।।
श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत्परमंब्रह्म ब्रह्मप्रोक्तं सनातनम् ।।
वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ।
परत्वेन भवं देवं भक्तस्त्वं परमेश्वरम् ।।
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ।
न शक्यं विस्तरात्कृत्स्नं वक्तुं शर्वस्य केनचित् ।।
युक्तेनापि विभूतीनामपि वर्षशतैरपि ।
यस्यादिर्मध्यमन्तश्च सुरैरपि न गम्यते ।।
कस्तस्य शक्नुयाद्वक्तुं गुणान्कात्स्न्र्येन माधव ।
किं तु देवस्य महतः संक्षिप्तार्थपदाक्षरम् ।।
शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य चैव हि ।
अप्राप्येह ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः ।।
यदा तेनाभ्यनुज्ञातः स्तुवत्येव सदा भवम् ।
अनादिनिधनस्याहं सर्वयोनेर्महात्मनः ।।
नाम्नां कंचित्समुद्देशं वक्ष्ये ह्यव्यक्तयोनिनः ।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ।।

शृणु नामसमुद्देशं यदुक्तं पद्मयोनिना ।
दश नामसहस्राणि यान्याह प्रपितामहः ॥
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ।
गिरेः सारं यथा हेम पुष्पात्सारं यथा मधु ॥
घृतात्सारं यथा मंडस्तथैतत्सारमुद्धृतम् ।
सर्वपाप्मापहमिदं चतुर्वेदसमन्वितम् ॥
प्रयत्नेनाधिगंतव्यं धार्यं च प्रयतात्मना ।
शान्तिदं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥
यश्चाभ्यसूयते देवं भूतात्मानं पिनाकिनम् ।
स कृष्ण नरकं याति सह पूर्वैः सहानुगैः ॥
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ॥
इदं ज्ञात्वान्तकालेऽपि गच्छेद्धि परमां गतिम् ।
पवित्रं मंगलं पुण्यं कल्याणमिदमुत्तमम् ॥
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।
इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां दिव्यानां राजत्वे समकल्पयत् ॥
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।
स्तवराजेति विख्यातो जगत्यमरपूजितः ।
ब्रह्मलोकादयं चैव स्तवराजोऽवतारितः ॥
यस्मात्तंडिः पुरा प्राह तेन तंडिकृतोऽभवत् ।
स्वर्गाच्चैवात्र भूर्लोकं तंडिना ह्यवतारितः ॥
सर्वमंगलमंगल्यं सर्वपापप्रणाशनम् ।
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ॥
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ।
तेजसामपि जत्तेजस्तपसामपि यत्तपः ॥

शान्तीनामपि या शान्तिर्द्युतीनामपि या द्युतिः ।
दान्तानामपि यो दान्तो धीमतामपि या च धीः ॥
देवानामपि यो देवो मुनीनामपि यो मुनिः ।
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः ॥
रुद्राणामपि यो रुद्रः प्रभुः प्रभवतामपि ।
योगिनामपि यो योगी कारणानां च कारणम् ॥
यतो लोकाः संभवन्ति न भवन्ति यतः पुनः ।
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ॥
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
सच्छ्रुत्वा मनुजश्रेष्ठ सर्वान्कामानवाप्स्यसि ॥

ॐ

स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ।।१।।
जटी चर्मी शिखण्डी च सर्वांगः सर्वभावनः ।
हरिश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ।।२।।
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ।।३।।
अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ।।४।।
महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ।।५।।
लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ।।६।।
सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ।।७।।
चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्यानमस्कर्ता मृगबाणार्पणोऽनघः ।।८।।
महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ।।९।।
योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ।।१०।।
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरोऽबलो गणः ।।११।।
गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित्परमोमन्त्रः सर्वभावकरो हरः ।।१२।।
कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खंगी पट्टिशी चायुधी महान् ।।१३।।

स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णिषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥१४॥
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
सृगालरूपः सिद्धार्थो मुण्डः सर्वशुभंकरः ॥१५॥
अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभस्थलः ॥१६॥
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरोनक्तंचरस् तिग्ममन्यः सुवर्चसः ॥१७॥
गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ॥१८॥
कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥१९॥
बहुभूतो बहुधरः स्वर्भानुरमृतो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥२०॥
घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥२१॥
अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥२२॥
तेजोपहारी बलहा मुदितोऽर्थोऽजितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥२३॥
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥२४॥
विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥२५॥
विष्णुप्रसादितो यज्ञः समुद्रो बडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥२६॥
उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥२७॥

शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धजो बली ।
वेणवी पणवी ताली खली कालकटंकटः ॥२८॥
नक्षत्रविग्रहमतिर्गुणबुधिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः ॥२९॥
विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा ॥३०॥
सर्वतूर्यविनादी च सर्वतोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरंगवित् ॥३१॥
त्रिदशस्त्रिकालधृक्कर्म सर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधिशत्रुविनाशनः ॥३२॥
सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो यज्ञभागवित् ॥३३॥
सर्ववासः सर्वशारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥३४॥
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥३५॥
मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपधृत् ॥३६॥
सर्वकामवसुश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ॥३७॥
रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सुवर्चसः ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥३८॥
सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः संमग्नश्च सहस्रदः ॥३९॥
पक्षी च पक्षिरूपश्च अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥४०॥
वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ॥४१॥

भिक्षुश्च भिक्षुरूपश्च विपणो मृदरव्ययः ।
महासेनो विशाखश्च षष्ठिभागो गवांपतिः ॥४२॥
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥४३॥
वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥४४॥
ईशान ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ॥४५॥
नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥४६॥
चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च ।
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ॥४७॥
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥४८॥
दम्भो ह्यदम्भो वैदम्भो वश्यो वशाकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥४९॥
अक्षरं परमं ब्रह्म बलवच्चक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥५०॥
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान् समरमर्दनः ॥५१॥
महामेघनिवासी च महाघोरो वशी करः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥५२॥
वृषणः शंकरो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः ॥५३॥
स्वस्तिदः स्वस्तिभागश्च भागी भागकरो लघुः ।
उत्संगश्च महांगश्च महागर्भपरयणः ॥५४॥
कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशः ॥५५॥

महामूर्धा महमात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥५६॥
महानासो महाकम्बुर्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥५७॥
लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥५८॥
महानखो महारोमो महाकोशो महाजऽः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥५९॥
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥६०॥
गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥६१॥
यजुः पादभुजो गुह्यः प्रकाशो जंगमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥६२॥
उपकारः प्रियः सर्वः कनकः कांचनच्छविः ।
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः ॥६३॥
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥६४॥
सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥६५॥
लोकपालस्तथा लोको महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः ॥६६॥
आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः ॥६७॥
कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥६८॥
परश्वधायुधो देव अनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ॥६९॥

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वांगरूपो मायावी सुहृदो ह्यनिलोऽनलः ।।७०।।
बन्धनो बन्धकर्ता च शुबन्धनविमोचनः ।
सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः ।।७१।।
बहुधा निन्दितः शर्वः शंकरो शंकरोऽधनः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ।।७२।।
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा ।
अजैकपाच्च कापाली त्रिशंकुरजितः शिवः ।।७३।।
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ।।७४।।
प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उषंगुश्च विधाता च मांधाता भूतभावनः ।।७५।।
विभुर्वर्णविभावी च सर्वकामगुणावहः ।
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ।।७६।।
बलवांश्चोपशान्तश्च पुराणः पुण्यचंचुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ।।७७।।
सर्वाशयो दर्भचारी सर्वेषां प्राणिनांपतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ।।७८।।
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ।।७९।।
वणिजो वर्धकी वृक्षो वकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रु रलोलश्च महौषधः ।।८०।।
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ।।८१।।
प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ।
सारंगो नवचक्रांगः केतुमाली सुभावनः ।।८२।।
भूतालयो भूतपतिरहोरात्रमनिन्दितः ।
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।।८३।।

अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ।
धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ॥८४॥
गोपालो गोपतिर्ग्रामो गोचर्मवसनो हरिः ।
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ॥८५॥
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः ।
गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ॥८६॥
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ।
महाकेतुर्महाधातुर्नैकसानुचरश्चलः ॥८७॥
आवेदनीय आदेशः सर्वगन्धशुखावहः ।
तोरणस्तारणो वातः परिधि पतिखेचरः ॥८८॥
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः ।
नित्यमात्मसहायश्च देवासुरपतिः पतिः ॥८९॥
युक्तश्च युक्तबाहुश्च देवो दिवि सुपर्वणः ।
आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ॥९०॥
वपुरावर्तमानेभ्यो वसुश्रेष्टो महापथः ।
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ॥९१॥
अक्षश्च रथयोगी च सर्वयोगी महाबलः ।
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ॥९२॥
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ।
रत्नप्रभूतो रन्नांगो महार्णवनिपानवित् ॥९३॥
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ।
आरोहणोऽधिरोहश्च शीलधारी महायशाः ॥९४॥
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ।
युगरूपो महारूपो महानागहनो वधः ॥९५॥
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ।
बहुमालो महामालः शशी हरसुलोचनः ॥९६॥
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ।
त्रिलोचनो विषण्णांगो मणिविद्धो जटाधरः ॥९७॥

बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः ।
निवेदनः सुखाजातः सुगन्धारो महाधनुः ॥९८॥
गन्धपाली च भगवानुत्तानः सर्वकर्मणाम् ।
मन्थानो बहुलो वायुः सकलः सर्वलोचनः ॥९९॥
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् ।
छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ॥१००॥
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ।
हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ॥१०१॥
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ।
सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृत् ॥१०२॥
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिंगलः ।
ब्रह्मदण्डविनिर्माता शतघ्नी पाश शक्तिमान् ॥१०३॥
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ।
गभस्तिर्ब्रह्मकृद्ब्रह्मो ब्रह्मविद् ब्राह्मणो गतिः ॥१०४॥
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ।
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ॥१०५॥
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ।
कर्णिकार महास्रग्वी नीलमौलिः पिनाकधृत् ॥१०६॥
उमापतिरुमाकान्तो जाह्नवीधृगुमाधवः ।
वरोवरोहो वरदो वरेण्यः सुमहास्वनः ॥१०७॥
महाप्रसादो दमनः शत्रुहा श्वेतपिंगलः ।
पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ॥१०८॥
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणोवरः ।
चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ॥१०९॥
साध्यर्षिर्वसुरादित्यो विवस्वान् सविताऽमृतः ।
व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ॥११०॥
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ।
कलाः काष्टा लवा मात्रा मुहूर्ताहः क्षपाः क्षणाः ॥१११॥

विश्वक्षेत्रं प्रजाबीजं लिंगमाद्यस्तु निर्गमः ।
सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ।।११२।।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ।
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परागतिः ।।११३।।
देवासुर विनिर्माता देवासुरपरायणः ।
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।।११४।।
देवासुरमहामात्रो देवासुरगणाश्रयः ।
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।।११५।।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ।
देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।।११६।।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽत्मसम्भवः ।
उद्भित्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।।११७।।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ।
विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।।११८।।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ।
गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।।११९।।
शृंगी शृंगप्रियो बभ्रू राजराजो निरामयः ।
अभिरामः सुरगणो विरामः सर्वसाधनः ।।१२०।।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ।
स्थावराणांपतिश्चैव नियमेन्द्रियवर्धनः ।।१२१।।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ।
व्रताधिपः परं ब्रह्म भक्तानां परमागतिः ।।१२२।।
विमुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्धनो जगत् ।
श्रीमान् श्रीवर्धनो जगत् ॐ नम इति ।।

यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ॥
यं न ब्रह्मादयो देवा विदुर्यं न महर्षयः ।
तं स्तव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ॥
भक्तिमेव पुरस्कृत्य मया यज्ञपतिर्वसुः ।
ततोऽभ्यनुज्ञां प्राप्यैव स्तुतो मतिमतां वरः ॥
शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्धनैः ।
नित्ययुक्तः शुचिर्भूत्वा प्राप्नोत्यात्मानमात्मना ॥
एतद्धि परमं ब्रह्म स्वयं गीतं स्वयंभुवा ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥
स्तूयमानो महादेवः प्रीयते चात्मनामभिः ।
भक्तानुकम्पी भगवानात्मसंस्थाकरोति तान् ॥
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥
जाग्रतश्च स्वपन्तश्च व्रजन्तः पथि संस्थिताः ।
स्तुवन्ति स्तूयमानाश्च तुष्यन्ति च रमन्ति च ।
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ॥
जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ।
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ॥
कारणं भावितं तस्य सर्वयुक्तस्तु सर्वतः ।
एकद्वेवेषु दुष्प्रापं मनष्येषु न लभ्यते ॥
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी ।
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
यया यान्ति परां सिद्धिं तद्भावगतचेतसः ॥
ये सर्वभावोपगताः परत्वेनाभवन्नराः ।
प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ॥
एवमन्ये न कुर्वन्ति देवाः संसारमोचनम् ।
मनुष्याणां महादेवादन्यत्रापि तपोबलात् ॥
इति तेनेन्द्रकल्पेन भगवान्सदसत्पतिः ।

कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुद्धबुद्धिना ॥
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥
मृत्युः प्रोवाच रुद्राणां रुद्रेभ्यस्तण्डिमागतम् ।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि ॥
तण्डिः प्रोवाच शुक्राय गौतमायाह भार्गवः ।
वैवस्वताय मनवे गौतमः प्राह माधव ॥
नारायणाय साध्याय मनुरिष्टाय धीमते ।
यमाय प्राह भगवान्साध्यो नारायणोऽच्युतः ॥
नाचिकेतय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ॥
मार्कण्डेयान्मया प्राप्तं नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्म्यद्य विश्रुतम् ।
स्वर्ग्यमारोग्यमायुष्यं धन्यं बल्यं तथैव च ॥
न तस्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ।
पिशाचा यातुधानाश्च गुह्यका भुजगा अपि ॥
यः पठेत शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥

इति श्रीमहाभारते अनुशासनपर्वणि सप्तदशोध्यायः ॥